শ্ৰীঃ

শ্ৰীমতে ৰামানুজায নমঃ

শ্ৰীমতে নিগমান্তমহাদেশিকায নমঃ

শ্ৰীৱেদৱ্যাসভট্টাৰ্যপুত্ৰৰত্নৈঃ শ্ৰীৱেদাচাৰ্যভট্টৈৰনুগৃহীতা

# ॥ শ্ৰী ক্ষমাষোডশিস্তোত্ৰম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্ৰী ৰঙ্গৰামানুজ মহাদেশিকন্

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী ক্ষমাষোডশিস্তোত্রম্ ॥

যশ্চক্রে রঙ্গিণস্স্তোত্রং ক্ষমাষোডশিনামকম্।
ৱেদৱ্যাসস্য তনযং ৱেদাচার্যং তমাশ্রযে॥

শ্রীরঙ্গেশ ! যযা করোষি জগতাং সৃষ্টিপ্রতিষ্ঠাক্ষযান্
অত্রামুত্র চ ভোগমক্ষযসুখং মোক্ষং চ তত্তত্তৃষাম্।
ৎৱৎস্বাতন্ত্র্যমপোহ্য কল্পিতজগৎক্ষেমাহতিহৃদ্যা স্বতঃ
ক্ষান্তিস্তে করুণাসখী ৱিজযতাং ক্ষেমায সর্ৱাত্মনাম্॥ **1** ॥

পাপানাং প্রথমোঽস্ম্যহং ভৱতি চেচ্ছাস্ত্রং প্রমাণং পরং
শ্রীরঙ্গেশ ! ন ৱিদ্যতেঽত্র ৱিশযস্সন্ত্যেৱ তে সাক্ষিণঃ।
পৃষ্টৱা তানধুনা মযোদিতমিদং সত্যেন গৃহ্যেত চেৎ
সত্যং হ্যুক্তমিতি ক্ষমস্ব ভগৱন্ সর্ৱং তদস্মৎকৃতম্॥ **2** ॥

ৎৱৎক্ষান্তিঃ খলু রঙ্গরাজ ! মহতী তস্যাঃ পুনস্তোষণে
পর্যাপ্তং ন সমস্তচেতনকৃতং পাপং ততো মামকম্।
লক্ষ্যং নেতি ন মোক্তুমর্হসি যতঃ কুত্রাপি তুল্যো মযা
নান্যস্সিদ্ধ্যতি পাপকৃত্তদধুনা লব্ধং তু নোপেক্ষ্যতাম্॥ **3** ॥

পুণ্যং পাপমিতি দ্বযং খলু তযোঃ পূর্ৱেণ যৎসাধ্যতে
তত্ত্বদ্বিস্মৃতিকারকং তনুভৃতাং রঙ্গেশ ! সঞ্জাযতে।
পাশ্চাত্যস্য তু যৎফলং তদিহ তে দুঃখচ্ছিদঃ স্মারকং
তেনানেন কৃতং তদেৱ শিশুনেত্যস্মৎকৃতং ক্ষম্যতাম্॥ **4** ॥

পুণ্যং যত্তৱ পূজনং ভৱতি চেৎ তৎকর্তুরিষ্টে কৃতে
তৎস্যাদ্রঙ্গপতে ! কৃতপ্রতিকৃতং সর্ৱেঽপি তৎকুর্ৱতে।
পাপং চেদপরাধ এৱ ভৱতস্তৎকর্তৃসংরক্ষণে
ক্ষান্তিস্তে নিরুপাধিকা নিরুপমা লক্ষ্যেত তৎক্ষম্যতাম্॥ **5**॥

ন দ্বিত্রাণি কৃতান্যনেন নিরয়ৈর্নালং পুনঃ কল্পিতৈঃ
পাপানামিতি মৎকৃতে তদধিকান্ কর্তুং প্রৱৃত্তে ৎৱযি।
তেভ্যোঽপ্যভ্যধিকানি তান্যহমপি ক্ষুদ্রঃ করোমি ক্ষণাৎ
তদ্যত্নস্তৱ নিষ্ফলঃ খলু ভৱেৎ তত্তে ক্ষমৈৱ ক্ষমা॥ **6**॥

সংভূযাখিলপাতকৈর্বহুৱিধং স্ৱং স্ৱং ফলং দীযতাং
সর্ৱং সহ্যমিদং মযা ৎৱযি হরে ! জাগ্রত্যপি ত্রাতরি।
দুঃখাক্রান্তমৱেক্ষ্য মামিহ জনো দুষ্টাশযৎস্ৱদ্গুণান্
ক্ষান্ত্যাদীন্ প্রতি দুর্ৱচং যদি ৱদেৎসোঢুং ন তচ্ছক্যতে॥ **7**॥

ক্ষান্তির্নাম ৱরো গুণস্তৱ মহান্ শ্রীরঙ্গপৃথ্ৱীপতে !
সোঽযং সন্নপি সাপরাধনিৱহাভাৱে ন ৱিদ্যোততে।
তস্মান্নৈকৱিধাপরাধকরণে নিষ্ঠাৱতা নিত্যশঃ
প্রাপ্নোত্যেষ মযা প্রকাশমতুলং প্রাপ্স্যাম্যহং চ প্রথাম্॥ **8**॥

মৎপাপক্ষপণায যোজযসি চেদ্ঘোরেণ দণ্ডেন মাং
রঙ্গাধীশ্ৱর ! কেৱলাঘকরণাদ্দুঃখং মম স্যান্মহৎ।
তদ্দ্রষ্টুর্ভৱতোঽপি দুঃখমতুলং ঘোরং দযালো ! ভৱেৎ
তস্মাৎ তেঽপি সুখায মৎকৃতমিদং সর্ৱং ৎৱযা ক্ষম্যতাম্॥ **9**॥

দেৱ ! ৎৱাং শরণং প্রপন্নমপি মাং দুঃখান্যনন্যাশ্রযং
বাধন্তে যদি সর্ৱপাপনিৱহাৎ ৎৱাং মোক্ষযিষ্যাম্যহম্।
ইত্যুক্তং তৱ ৱাক্যমর্থৱিধুরং জাযেত যদ্বা ভৱান্
তত্রাশক্ত ইতি প্রথেত হি ততো মাং রক্ষতু ৎৱৎক্ষমা॥ **10**॥

ন ৎৱং ক্ষাম্যসি চেদিদং মম কৃতং নাস্ত্যত্র কাচিৎক্ষতিঃ
পূর্ৱং যৎসমভূত্তদেৱ হি পুনর্জাযেত তজ্জাযতাম্।
যদ্বা স্যাদধিকং চ সোঽপি সুমহান্ লাভোঽস্তু মে তাদৃশঃ
স্বামিন্ ! দাসজনস্তৱাযমধিকং স্বৈরেণ দূরীভৱেৎ॥ **11** ॥

সোঽহং ক্ষুদ্রতযা জুগুপ্সিততমং দুষ্কর্ম নিত্যং স্মরন্
কুর্ৱন্ কামমশুদ্ধরীতিরভৱং শ্রীরঙ্গপৃথ্ৱীপতে !।
এতত্তে মহতো ৱিশুদ্ধমনসা স্মর্তুং ন যুক্তং খলু
ক্ষান্ত্যা ৱিস্মর তত্ততোঽহমসুখান্মুক্তো ভৱেযং সুখী॥ **12** ॥

তত্তৎকর্মফলানুরূপমখিলো লোকস্ত্বযা সৃজ্যতে
তস্মাৎকর্মৱশংৱদৎৱমধিকং ৱক্তুং তৱাপি ক্ষমম্।
শ্রীরঙ্গেশ্ৱর ! তৎপ্রশান্তিৱিধযে ক্ষান্ত্যা নিরাকৃত্য মে
সর্ৱং পাতকমাশু দর্শয ভৱৎস্বাতন্ত্র্যমত্যঙ্কুশম্॥ **13** ॥

শ্রীরঙ্গেশ ! ৱচো মদীযমধুনা ৱ্যক্তং ৎৱযা শ্রূযতাং
পুণ্যং তৎফলসঙ্গমাত্রৱিরহাদ্ভূযো ন মাং প্রাপ্নুযাৎ।
পাপং নৈৱ তথা ফলং ৱিতনুতে শক্যং ন তদ্বারণং
তৎক্ষান্ত্যা তৱ শক্যমেৱ তদিদং সদ্যস্ত্বযা কল্প্যতাম্॥ **14** ॥

শ্রীরঙ্গেশ্ৱর ! পুণ্যপাপফলযোঃ স্বাধীনতাং কুর্ৱতোঃ
সর্ৱেষাং সুখদুঃখযোঃ স্বযমহং মগ্নাশযো মামপি।
স্মর্তুং ন প্রভৱামি কিং পুনরহং ৎৱামন্তরন্তঃ স্থিতং
তত্তে ৎৱং ক্ষমযা নিরস্য কুরু মে ৎৱদ্ধ্যানযোগ্যাং দশাম্॥ **15** ॥

অল্পং চেদনৱেক্ষণীযসরণাৱারোপ্যতাং মৎকৃতং
কিঞ্চিদ্ভূরি ভৱেদিদং যদি গুরূন্ সংপ্রেক্ষ্য মে ত্যজ্যতাম্।
যদ্বাঽনন্তমনন্তৱৈভৱজুষো রঙ্গক্ষমাৱল্লভ !
ৎৱৎক্ষান্ত্যাঃ খলু লক্ষ্যতামনুগুণামানীযতাং তত্ত্বযা॥ **16** ॥

শ্রীমান্ কূরান্ৱৱাযে কলশজলনিধৌ কৌস্তুভামোঽৱতীর্ণঃ
    শ্রীৱেদৱ্যাসভট্টারকতনযৱরো রঙ্গরাজস্য হৃদ্যঃ।
ৱেদাচার্যগ্র্যনামা ৱিদিতগুণগণো রঙ্গিণঃ স্তোত্রমেতৎ
    চক্রে নিত্যাভিজপ্যং সকলতনুভৃতাং সর্ৱপাপাপনুত্ত্যৈ॥ **17**॥

সন্ত্যক্তসর্ৱৱিহিত ক্রিযমর্থকাম
    শ্রদ্ধালুমন্ৱহমনুষ্ঠিতনিন্দ্যকৃত্যম্।
অত্যন্তনাস্তিকমনাত্মগুণোপপন্নং
    মাং রঙ্গরাজ ! পরযা কৃপযা ক্ষমস্ৱ॥ **18**॥

॥ শ্রী ক্ষমাষোডশিস্তোত্রং সমাপ্তম্॥